PER

PERFORMANCE, *s.* (Execution) करणं, विधानं, अनुष्ठानं, आचरणं, निर्वहणं, निर्वाहः, साधनं, सम्पादनं, निष्पादनं, निष्पत्तिः *f.*, निर्वर्त्तनं, प्रवर्त्तनं, चर्य्या.—(Act, action) क्रिया, कर्म्म *n.* (न्), कृतिः *f.*, कृत्या, प्रवृत्तिः *f.*, चेष्टा, विचेष्टितं, व्यापारः.—(Theatrical) अभिनयः, नटनं, नाट्यं, नर्त्तनं, नटचर्य्या, नाटः -टनं, नाटकः.

PERFORMED, *p. p.* कृतः -ता -तं, अनुष्ठितः &c., आचरितः &c., विहितः &c., निर्वाहितः &c., निष्पादितः &c., सम्पादितः &c., साधितः &c., सिद्धीकृतः &c.; 'one who has performed his duty,' कृतकृत्यः.

PERFORMER, *s.* कर्त्ता *m.* (र्त्तृ), कारकः, अनुष्ठाता *m.* (तृ), विधायी *m.* (न्), अनुष्ठायी *m.*, साधकः, सम्पादकः, निर्वाहकः, प्रवर्त्तकः, प्रणेता *m.* (तृ), प्रयोजकः.—(Actor) नटः, अभिनेता *m.* (तृ), अभिनयी *m.* (न्), अभिनयकारी *m.*—(Musical) वाद्यवादकः, भाण्डवादकः, वादकः.

PERFUME, *s.* (Scent) सुगन्धः, सुगन्धिः *m.*, सुवासः, आमोदः, परिमलः, सुरभिः *m.*, सौरभ्यं, सौरभं, गन्धः, इष्टगन्धः, वासः, मोदः, घ्राणतर्पणः.—(Substance that emits scent) गन्धः, सुगन्धिद्रव्यं, सुरभिद्रव्यं, सामोदद्रव्यं, सुवासिकद्रव्यं, परिमलद्रव्यं, धूपः, जवादिः *m.*—(For the person) विलेपः -पनं, अनुलेपः -पनं, गात्रानुलेपनी, वर्णकं, अभ्यञ्जनं, वर्त्तिः -र्त्ती; 'perfumed paste,' यक्षकर्द्दमः.—(Compounded perfume) कृत्रिमधूपकः, वृकधूपः, वकधूपः.

*To* PERFUME, *v. a.* सुरभीकृ, वास् (c. 10. वासयति -यितुं), अनुवास्, अधिवास्, धूपेन वास्, धूप् (c. 10. धूपयति -यितुं, c. 1. धूपायति), परिधूप्, अवधूप्, सुगन्धीकृ, सामोदीकृ, आमोद (nom. आमोदयति -यितुं), परिमल (nom. परिमलयति -यितुं), सपरिमलीकृ, अनुवासनं कृ, सवासीकृ.

PERFUMED, *p. p.* वासितः -ता -तं, अधिवासितः -ता -तं, अनुवासितः &c., सुवासितः &c., सवासः -सा -सं, वाशितः &c., सुरभितः &c., आमोदितः &c., परिमलितः &c., सुगन्धितः &c., धूपितः &c., धूपायितः &c., परिधूपितः &c., भावितः &c., चर्चितः &c.

PERFUMER, *s.* गन्धविक्रयी *m.* (न्), गन्धविक्रेता *m.* (तृ), गन्धवणिक् *m.* (ज्), गन्धोपजीवी *m.*, गन्धविक्रयोपजीवी *m.*, गन्धाजीवः, गान्धिकः, सुगन्धिद्रव्यव्यवसायी *m.*

PERFUMERY, *s.* पूर्व्वोक्तवणिग्विक्रीता सुगन्धिद्रव्यसामग्री or गन्धादिद्रव्यसामग्री, गन्धद्रव्यं, गन्धादिद्रव्यं, सुगन्धिद्रव्यादि *n.*, सुरभिद्रव्यं.

PERFUMING, *s.* (The act) वासनं, सुगन्धिद्रव्यवासनं, अनुवासनं.—(Perfuming the person) चर्चा, चर्चिका, चार्चिक्यं, अनुलेपनं, विलेपनं, अभ्यञ्जनं, स्थासकः, अङ्गरागः.

PERFUNCTORILY, *adv.* ईषदवेक्षया, अनवधानेन, ईषदवधानेन, ईषद्यत्नपूर्व्वं.

PERFUNCTORINESS, *s.* ईषदवेक्षा, ईषदवधानं, ईषत्प्रयत्नत्वं, ईषदुद्योगः.

PERFUNCTORY, *a.* ईषदवहितः -ता -तं, ईषद्यत्नकृतः &c., ईषदवधानकृतः &c.

PERHAPS, *adv.* अपिनाम, किंस्वित्, स्यात्, कदापि, कदाचित्, किल, अपि, नाम, दैवात्, दैववशात्, नुवा, नूनं, प्रायेण, यदाकदाचित्, यथाकदाचित्; 'if perhaps,' यदि कदाचित्, यदि कदापि; 'or perhaps,' अपिवा, स्याद्वा, यद्वा.

PERIAPT, *s.* (Amulet) कवचः -चं, संवदनं.

PERICARDIUM, *s.* हृदाशयः, हृदयाशयः, हृत्कोशः, हृदयकोशः.

PERICARP, *s.* वीजकोशः, वीजगुप्तिः *f.*, वीजमातृका, कर्णिका, कर्णिकारः.

PERICRANIUM, *s.* (Membrane investing the skull) कपालावरणत्वक् *f.* (च्), कपालावरकत्वक् *f.*, कपालावरकान्तस्त्वक् *f.*, कपालावरणं.—(Skull) कपालः -लं.

PERIERGY, *s.* अत्युद्योगः, अतियत्नः, अत्युत्साहः, अत्याचारः.

PERIGEE, PERIGEUM, *s.* नीचं, नीचस्थानं.

PERIL, *s.* भयं, भयहेतुः *m.*, संशयः, सन्देहः, संशयहेतुः *m.*, शङ्का, विकल्पः. *See* DANGER.—(Peril of life) जीवितसंशयः, प्राणसंशयः, प्राणसङ्कटं प्राणसन्देहः. *See* JEOPARDY.

*To* PERIL, *v. a.* संशयस्थं -स्थां कृ, सन्देहस्थं -स्थां कृ, भयस्थं -स्थां कृ, शङ्कास्पदीकृ, भयस्थानीकृ. *See To* ENDANGER, HAZARD.

PERILED, *p. p.* संशयितः -ता -तं, शङ्कास्पदीकृतः -ता -तं.

PERILOUS, *a.* भयहेतुकः -का -कं, संशयहेतुकः &c., सन्दिग्धः -ग्धा -ग्धं, भयानकः -का -कं, भयङ्करः -री -रं, सभयः -या -यं, ससंशयः -या -यं, सशङ्कः -ङ्का -ङ्कं, दुस्तरः -रा -रं; 'a perilous business,' प्राणान्तव्यवहारः. *See* DANGEROUS, HAZARDOUS.

PERILOUSLY, *adv.* सभयं, ससंशयं, ससन्देहं, सशङ्कं, सन्दिग्धं, शङ्कापूर्व्वं, भयानकं, शङ्कया. *See* DANGEROUSLY.

PERILOUSNESS, *s.* सभयता -त्वं, सशङ्कत्वं, सन्दिग्धता, भयानकत्वं, भयं.

PERINEUM, PERINÆUM, *s.* (In anatomy) विटपः, महावीर्य्यं.

PERIOD, *s.* (Revolution of time) कालचक्रं, कालपरिमाणं, कालपर्य्यायः, कालावृत्तिः *f.*, कालावर्त्तः, कालपरिवृत्तिः *f.*, वर्षचक्रं, संवत्सरचक्रं, कालमानं, वर्षगणः.—(Term or specified portion of time) कालावधिः *m.*, अवधिः *m.*, कालमर्य्यादा, कालान्तरं, अन्तरं, नेमः, नियतकालः, निरूपितकालः; 'period of five years,' वर्षपञ्चकं, वत्सरपञ्चत्वं, युगं; 'of four years,' वर्षचतुष्टयं.—(End, conclusion) अन्तः -न्तं, अवसानं, शेषः, निर्वृत्तिः *f.*—(Indefinite portion of any continued state) अवस्था, दशा, कालांशः, कालभागः, कालावयवः, कालविभक्तिः *f.*; 'period of life,' वयस् *n.*; 'first period of life,' प्रथमवयस्; 'middle period,' मध्यमवयस्; 'last period,' अन्त्यवयस्; 'one who is in the middle period,' मध्यमवयाः -याः -यः (स्), मध्यमवयस्कः -स्का -स्कं; 'the four periods of life,' अवस्थाचतुष्टयं.—(Complete sentence) पूर्णवाक्यं, फक्किका.—(Mark of the end of a complete sentence) पूर्णवाक्यचिह्नं.—(Astronomical period) योगः, गण्डः. The period called मन्वन्तरं, is equal to 71 ages of the gods, or 306,720,000 years of mortals, and with its सन्धिः or period of universal deluge, to 308,448,000 years. Fourteen 'Manwantaras' constitute a कल्पः, or the grand period of creation and destruction, consisting of 4,320,000,000 years.

PERIODIC, PERIODICAL, *a.* (Happening by revolution, regularly recurring) नियतकालिकः -की -कं, नियमितकालिकः &c., निरूपितकालिकः &c., नित्यः -त्या -त्यं, नैमित्तिकः -की -कं, नित्यनैमित्तिकः &c., सामयिकः -की -कं.—(Pertaining to a revolution, performed in one) चाक्रिकः -की -कं, परिवर्त्तनात्मकः -का -कं, परिवर्त्तनसम्बन्धी -न्धिनी &c., परिवर्त्तनविशिष्टः -ष्टा -ष्टं, कालावृत्तिविशिष्टः &c.

PERIODICALLY, *adv.* काले काले, कालक्रमेण, नित्यशस्, नित्यदा, नित्यं, नित्यकाले, नियतकालानुसारेण, नियतकाले, नियतं, निरूपितसमये, नियतसमये, समयतस्.

PERIODICALNESS, PERIODICITY, *s.* कालनियतत्वं, नियतकालिकत्वं, नित्यता.

PERIOSTEUM, *s.* (In anatomy) अस्थित्वक् *f.* (च्), अस्थित्वचा, अस्थ्यावरणत्वक् *f.*, अस्थ्यावरणचर्म्म *n.* (न्).

PERIPHERY, *s.* परिधिः *m.*, परिणाहः, परीणाहः. *See* CIRCUMFERENCE. (Of a wheel) प्रधिः *m.*, प्रधिमण्डलं, नेमिः -मी *f.*, चक्रपरिधिः *m.*

PERIPHRASE, PERIPHRASIS, *s.* वाक्प्रपञ्चः, वाग्विस्तारः, वाक्यबाहुल्यं.

*To* PERIPHRASE, *v. a.* वाग्बाहुल्येन or वाक्यबाहुल्येन or वाग्विस्तारेण व्याख्या (c. 2. -ख्याति -तुं), वाग्विस्तारं कृ, वाक्प्रपञ्चं कृ.

PERIPHRASTIC, PERIPHRASTICAL, *a.* बहुवाक्यः -क्या -क्यं, विस्तीर्णवाक्यः